# संस्कृत-वार्ता:

दिनाङ्क : 17/11/2025 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- बाङ्ग्लादेशस्य अपदस्थ: प्रधानमन्त्री शेख हसीना तथा पूर्वगृहमन्त्री असदुज्जमा खान कमाल: च अद्य देशस्य अन्तर्राष्ट्रीय आपराधिकन्यायालयेन मानवताविरुद्धं अपराधानां कृते मृत्युदण्डं श्रावितौ।
- सऊदी अरबदेशे मक्का-नगरात् मदीना-नगरं गच्छन्ती बस-यान दुर्घटनायां द्विचत्वारिंशत् भारतीय तीर्थयात्रिणः मृत्युमुपगताः। श्रीमोदी अवदत् यत् तस्य संवेदनाः मृत्युगतानां परिवाराणां प्रियजनानां कृते सन्ति।
- सेना-प्रमुखः उपेन्द्रःद्विवेदी उक्तवान् यत् सिन्दूराभियानं केवलं एकं लघु-चलचित्ररूपेण आसीत्, यः अष्टाशीतिः होरासु समाप्तं जातम् ।
- अद्य दिल्ल्याः एकेन न्यायालयेन लालकिलायां सञ्जाते प्रकरणे आमिर रशीद अलीं दश दिवसीयै कारावास दण्डाय प्रेषितः ।

---

<u>बाङ्ग्लादेशस्य अपदस्थः</u>

बाङ्ग्लादेशस्य अपदस्थः प्रधानमन्त्री शेख हसीना तथा पूर्वगृहमन्त्री असदुज्जमा खान कमाल: च अद्य देशस्य अन्तर्राष्ट्रीय आपराधिकन्यायालयेन मानवताविरुद्धं अपराधानां कृते मृत्युदण्डं श्रावितौ। ध्यातव्यमस्ति यत् न्यायाधिकरणेन आरक्षि -महानिरीक्षकस्य चौधरी-अब्दुल्लाह-अल्-मामुनं अस्मिन्नेव प्रकरणे पञ्चवर्षीय:-कारावास- दण्ड: श्रावितः आसीत् ।

---

<u>सऊदी अरबदेश</u>

सऊदी अरबदेशे मक्का-नगरात् मदीना-नगरं गच्छन्ती बस-यान दुर्घटनायां द्विचत्वारिंशत् भारतीय तीर्थयात्रिणः मृत्युमुपगताः। भारतीय समयानुसारं रात्रौ सार्धैकवादने मुफरीहाटनामके स्थाने एषा घटना सञ्जाता। जेद्दाहस्य भारतस्य वाणिज्यदूतावासेन अद्य सऊदी अरबदेशस्य मदीना-नगरस्य समीपे दुःखद-बसयानस्य दुर्घटनायाः अनंतरं सहायता-सङ्ख्याः प्रख्यापिताः । एकस्मिन् सामाजिक अन्तर्जालीय संदेशे वाणिज्यदूतावासेन सूचितं यत् परिसरे अहर्निशं नियन्त्रण-कक्षः स्थापितः अस्ति । सममेव सहायता संख्या - अष्ट, शून्यं,शून्यं- द्वे, चत्वारि,चत्वारि-शून्यं, शून्यं, शून्यं, त्रीणि/ शून्यं, एकं, द्वे,-द्वे,षट्,एकं-चत्वारि, शून्यं, नव, त्रीणि/ शून्यं, एकं, द्वे- षट्, षट्, षट् एकं,-चत्वारि, द्वे, सप्त, षट्/ शून्यं, पञ्च, पञ्च,-षट्, एकं, द्वे -द्वे, त्रीणि, शून्यं, एकं, प्रख्यापिताः। प्रधानमन्त्री नरेन्द्रमोदी सऊदी अरबदेशे सञ्जातायाम् दुर्घटनायां भारतीयनागरिकाणां समेत्य अन्येषां मृत्युमालक्ष्य दुःखं प्रकटितवान् । श्रीमोदी अन्तर्जालीय-संदेश-माध्यमेन अवदत् यत् तस्य संवेदनाः मृत्युगतानां परिवाराणां प्रियजनानां कृते सन्ति। सः आहतानाम् शीघ्रं स्वस्थतां प्राप्तुं कामयते। प्रधानमन्त्रिणा उक्तं यत् रियादस्थ दूतावासस्य, जेद्दाह-नगरस्थ वाणिज्यदूतावासस्य च कृते सर्वाः सम्भाव्यसहायताः प्रदास्यन्ति । सः अवदत् यत् भारतीयाधिकारिणः सऊदी अरब-अधिकारिभिः सह अपि सम्पर्कं कुर्वन्ति। उपराष्ट्रपतिः सी.पी. राधाकृष्णन् मदीनामार्गदुर्घटनायाः विषये दुःखं प्रकटितवान्। एकस्मिन् सामाजिकान्तर्जालीय संदेशे सः अवदत् यत् अस्मिन् प्रतिकूलसमये प्रभावितपरिवारैः सह तस्य संवेदनाः सन्ति। उपराष्ट्रपतिः शोकाकुल परिवारेभ्यः शोकसंवेदनाम् अभिव्यक्तवान्, सममेव व्रणितानां कृते शीघ्रं स्वस्थं भवितुं कामना अपि विहिता अस्ति ।

---

**सेना प्रमुखः**

सेनाप्रमुखः उपेन्द्रद्विवेदी उक्तवान्, यत् सिन्दूराभियानं केवलं एकं लघु-चलचित्ररूपेण आसीत्, यः अष्टाशीतिः होरासु समाप्तं जातम् । सः अवदत् यत् भविष्ये कस्यापि स्थितिः कृते भारतम् सज्जीकृतम् अस्ति। श्री द्विवेदी उक्तवान् यत् यदि पाकिस्तानः कदापि किमपि दुष्कृतं करोति, तर्हि भारतीयसशस्त्रसेना समीपस्थं देशं भारतेन सह दायित्वपूर्वकं व्यवहारं कर्तुं शिक्षयिष्यति। सेनाप्रमुखः अवदत् यत् आतङ्कवादः भारतस्य कृते चिन्ताजनकः विषयः अस्ति, यतो हि

भारतम् सर्वदा प्रगतेः विकासस्य च विषये आलपति। नवदिल्ल्यां रक्षा-संवादस्य समारोहं सम्बोधयन् श्रीद्विवेदी प्रोक्तवान् यत् अस्मिन् वर्षे आतंकवादस्य गतिविधिषु अल्पता दृग्गोचरीभूता ।

---

## आमिर रशीद अली दिल्ल्याः न्यायालय

अद्य दिल्ल्याः एकेन न्यायालयेन लालकिलायां सञ्जाते प्रकरणे आमिर रशीद अलीं दश-दिवसीयै कारावास-दण्डाय प्रेषितः । अली, काश्मीरस्य निवासी उमर-मुहम्मद-नबी इत्यनेन सह षड्यंत्रं कृतवान् इति आरोपः अस्ति । सः सत्र-न्यायाधीशस्य समक्षं प्रस्तुतः आसीत् । ह्यः एन.आई.ए. संस्थया अलीं निगडितः। यस्य नामधेयं प्रयुक्तं विस्फोटके चतुश्चक्रिका-यानं पञ्जीकृतम् आसीत्। सः दिल्लीनगरे एकस्य अन्वेषणाभियानस्य कार्यक्रमस्य समये निगडितः आसीत् । ध्येयास्पदं वर्त्तते यत् अन्वेषणं सजवं प्रचलति। एन.आई.ए इति संस्था दिल्ली-आरक्षि-बल , जम्मू-कश्मीर-आरक्षि-बल , हरियाणा-आरक्षि-बल, उत्तरप्रदेश-आरक्षि-बल चेत्येतेषां अनेकानां केन्द्रीयसंस्थानां च सहैव समन्वयं कुर्वद् अस्ति, अपि च विभिन्नेषु स्थानेषु स्वस्य अन्वेषणं निरन्तरं कुर्वद् अस्ति।

---

## ऋतुविज्ञानविभाग

ऋतुविज्ञानविभागेन अद्य मध्यमहाराष्ट्रः, मध्यप्रदेशः, झारखण्डः, राजस्थानः, विदर्भः चेत्यादिषु राज्येषु शीतलहर्याः स्थितेः पूर्वमेव भविष्यति एव इति अनुमानं प्रकटितम् । अद्य तमिलनाडु, पुद्दुचेरी, कराइकल-नगराणां पृथक् - पृथक् स्थानेषु तीव्रवृष्टेः संभावना प्रकटिता अस्ति । आगामि द्वि - त्रि दिवसेषु आन्ध्रप्रदेश-केरल-माहे चेत्यादिषु राज्येषु एतादृशी एव स्थितिः भवितुं शक्नोति। ऋतुविज्ञानविभागेन अण्डमान-निकोबार-द्वीप समूहे विद्युत्-प्रवृत-वायुभिः सह अल्पवृष्टेः संभावना प्रकटिता अस्ति ।

।। इति वार्ताः ।।